दिनाङ्क :-19.11.2025 प्रात: - 06:55

## पीएम-कोयम्बटूर

प्रधानमंत्री श्रीनरेन्द्र-मोदी अद्य तमिलनाडु-राज्यस्य कोयम्बटूर-नगरे दक्षिण-भारतीय-प्राकृतिक-कृषिशिखर-सम्मेलनस्य उद्घाटनं करिष्यति । शिखरसम्मेलनस्य उद्देश्यमिदं वर्तते, यत् स्वर्गीयेन, नम्मालवर-नामकेन जैविक-कृषकेन, प्रचारित-प्राकृतिक-कृषिप्रथायाःविश्वे प्रदर्शन-पुरस्सरं प्रचारः। अस्मिन् शिखरसम्मेलने पञ्चसहस्राणि कृषकाः उपस्थिताः भविष्यन्ति इति अपेक्षा अस्ति। प्रधानमन्त्री प्राकृतिक-कृष्याभ्यासं कुर्वद्भिः कृषकैः सह संवादं करिष्यति, आयोजने दश अनुकरणीय-श्रेष्ठ-कृषकाणां सम्माननम् अपि करिष्यति। सः नव-कोटि-कृषकाणां कृते अष्टादश-सहस्रकोटिरूप्यकाणां एकविंशतितमं प्रधानमन्त्री-कृषक-सम्मानन-धनराशि-खण्डमपि विमोचयिष्यति। त्रिदिवसीयं कृषिशिखरसम्मेलनं नवम्बर् एकविंशति-दिनाङ्के समाप्तं भविष्यति ।

## जयशंकर-एस्.ई.ओ

विदेशमन्त्री डॉ. एस.जयशंकरः सबलं प्रतिपादितवान् यत् आतङ्कवादविरुद्धं स्व-नागरिकाणां रक्षणं भारतस्य सिद्धः अधिकारः अस्ति, अपि च तस्य प्रयोगं अग्रेऽपि करिष्यति । रशिया देशस्य मास्कोनगरे शङ्घाई-सहकार-संघटनस्य सर्वकार-प्रमुख-परिषदं सम्बोधयन् डॉ. जयशङ्करः अवदत् यत् विश्वे आतङ्कवादं विरुद्ध्य शून्यसहिष्णुता दर्शयितव्या। विदेशमन्त्री अवदत् यत् जलवायुपरिवर्तनेन, महामारीभिः, अन्यसंकटैः च ग्रस्ते अस्मिन् काले मानवीयसहकार्यं महत्त्वपूर्णम् अस्ति। सः प्रकाशितवान्, यत् सभ्य-नागरिकत्वेन भारतं दृढतया विश्वसिति यत् कस्यचित् वास्तविकसम्बन्धस्य मूलं जन-जनेषु आदान-प्रदानं भवति । डॉ. जयशंकरः अवदत् यत्, भारतस्य मतमिदं वर्तते यत् शङ्घाई-सहकार-संघटनम्, परिवर्तनशील-वैश्विकपरिदृश्यस्य आनुकूल्यमनुसृत्य, विस्तारितां कार्यसूचीं विकसितुं, स्वकार्यपद्धतिषु परिवर्तनं च कर्तुं अर्हति ।

## बिहार सरकारः

बिहार-राज्ये एनडीए घटक-दलस्य नवनिर्वाचित-विधायकानां संगोष्ठी अद्य पटना-नगरे भविष्यति। अस्यां संगोष्ठ्यां भारतीय जनता पार्टी, संयुक्त-जनता-दलम्, लोकजनशक्ति-पार्टी-(रामविलासः), हिन्दुस्तानी आवाम मोर्चा, राष्ट्रीय लोक मोर्चा चेति, राष्ट्रिय प्रजातान्त्रिक-घटबन्धनस्य पञ्चदलानां सर्वेऽपि द्व्युत्तर-द्विशतम् विधायकाः मिलित्वा स्वनेतारं परिचिन्वन्ति। भाजपा-संसदीयमण्डलेन, भाजपाविधायकदलस्य नेतुः निर्वाचनस्य कृते उत्तरप्रदेशस्य उपमुख्यमन्त्री केशवप्रसादमौर्यः, पर्यवेक्षकत्वेन नियुक्तः। तदतिरिक्तं केन्द्रीयमन्त्री अर्जुनराममेघवालः पूर्वकेन्द्रीयमन्त्री साध्वी निरञ्जनज्योतिः च सहपर्यवेक्षकरूपेण नियुक्तौ स्तः ।

## सूचना प्रसारण- परामर्शः :

सूचनाप्रसारणमन्त्रालयेन लालकिला इति रक्तदुर्ग-कार-बम्ब-विस्फोटस्य घटनायाः सम्बद्धानां संवेदन-शील-सामग्रीणां दूरप्रसारणस्य विषये सर्वेभ्यः निजी-उपग्रह-दूरदर्शन-माध्यमेभ्यः परामर्शः प्रकाशितः । मन्त्रालयेन सूचना प्राप्ता वर्तते यत् - केचन समाचार-माध्यमाः कार-बम्ब-विस्फोट-प्रकरणे सम्बद्धानां कथितानां व्यक्तिनां विषये सामग्रीं प्रसारयन्ति, तेषां हिंसाकार्यं न्याय्यमिति समर्थनं च कुर्वन्ति अपि च विस्फोटक-सामग्रीनिर्माणं कथं भवतीत्यपि प्रदर्शयन्ति ।

## मीआ- सऊदी अरब :

विदेशमन्त्रालयेन उक्तं, यत् अस्मिन् मासे सप्तदश-दिनाङ्के मदीनानगरे भारतीयतीर्थयात्रिकाणां दुःखद-मृत्यु-घटनायाः अनन्तरं आन्ध्रप्रदेशस्य राज्यपालस्य न्यायाधीश-एस-अब्दुल-नजीरस्य नेतृत्वे भारतसर्वकारस्य उच्चस्तरीय-प्रतिनिधिमण्डलम् अद्य सऊदी अरबदेशस्य यात्रां करिष्यति ।

## मौसमः

भारतीय ऋतुविज्ञान-विभागेन अण्डमान-निकोबारद्वीपेषु, लक्षद्वीपे, तमिलनाडुराज्ये, पुडुचेरी-करैलयोः च अत्यधिकवृष्टेः पूर्वानुमानं कृतम् अस्ति । विभागेन अद्य आन्ध्रप्रदेशस्य, केरलस्य, माहे, लक्षद्वीपस्य च एकान्तस्थानेषु विद्युत्सहितं वज्रपातस्य अपि पूर्वानुमानं कृतम् अस्ति । ऋतुविज्ञान-विभागेन उक्तं यत् अस्य मासस्य विंशति-दिनाङ्कपर्यन्तं मध्यमहाराष्ट्रे मध्यप्रदेशे च शीततरङ्गस्य स्थितिः प्रचलति ।

## क्रिकेट्-उदयमान-स्टार-एशिया-कप-२०२५ :

क्रिकेट्-क्रीडायां, भारत-ए-दलेन ह्यः कतार-देशस्य दोहा-नगरस्य वेस्ट्-एण्ड्-पार्क्-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे स्वस्य अन्तिम-समूह-बी-क्रीडायां ओमान-विरुद्धं षड्-स्तोभक-विजयेन ऐषमः राइजिंग्-स्टार्स्-एशिया-कप- इति क्रिकेट्-चषक-प्रतियोगितायाः उपान्त्यचक्रं प्रविष्टम् ।

।।ति वार्ताः।।